# Shri Kamakalakali Sahasranamastotram

# શ્રીકામકલાકાલીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : kAmakalAkAlIsahasranAmastotra

File name : kAmakalAkAlIsahasranAmastotra.itx

Category : sahasranAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Transliterated by : DPD, help fro Alex

Proofread by : DPD, Narayanaswami Pallasena ppnswami at gmail.com

Description-comments : See corresponding nAmAvalI

Source : mahAkAlasaMhitA kAmakalA khaNDa dvAdashapaTala

Latest update : November 14, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

January 30, 2023

*sanskritdocuments.org*

# શ્રીકામકલાકાલીસહસ્રનામસ્તોત્રમ્

It is recommended to chant trailokyamohanakAlIkavacham before reciting the sahasranAma stotra or nAmAvalI

દેવ્યુવાચ ।
ત્વત્તઃ શ્રુતં મયા નાથ દેવ દેવ જગત્પતે ।
દેવ્યાઃ કામકલાકાલ્યા વિધાનં સિદ્ધિદાયકમ્ ॥ ૧॥

ત્રૈલોક્યવિજયસ્યાપિ વિશેષેણ શ્રુતો મયા ।
તત્પ્રસઙ્ગેન ચાન્યાસાં મન્ત્રધ્યાને તથા શ્રુતે ॥ ૨॥

ઇદાનીં જાયતે નાથ શુશ્રુષા મમ ભૂયસી ।
નામ્નાં સહસ્રે ત્રિવિધમહાપાપૌઘહારિણિ ॥ ૩॥

શ્રુતેન યેન દેવેશ ધન્યા સ્યાં ભાગ્યવત્યપિ ।
શ્રીમહાકાલ ઉવાચ ।
ભાગ્યવત્યસિ ધન્યાસિ સન્દેહો નાત્ર ભાવિનિ ॥ ૪॥

સહસ્રનામશ્રવણે યસ્માત્તે નિશ્ચિતં મનઃ ।
તસ્યા નામ્નાન્તુ લક્ષાણિ વિદ્યન્તે ચાથ કોટયઃ ॥ ૫॥

તાન્યલ્પાયુર્મતિત્વેન નૃભિર્દ્ધારયિતું સદા ।
અશક્યાનિ વરારોહે પઠિતું ચ દિને દિને ॥ ૬॥

તેભ્યો નામસહસ્રાણિ સારાણ્યુદ્ધૃત્ય શમ્ભુના ।
અમૃતાનીવ દુગ્ધાબ્ધેર્ભૂદેવેભ્યઃ સમર્પિતમ્ ॥ ૭॥

કાનિચિત્તત્ર ગૌણાનિ ગદિતાનિ શુચિસ્મિતે ।
રૂઢાણ્યાકારહીનત્વાદ્ ગૌણાનિ ગુણયોગતઃ ॥ ૮॥

રાહિત્યાદ્રૂઢિગુણયોસ્તાનિ સાઙ્કેતકાન્યપિ ।
ત્રિવિધાન્યપિ નામાનિ પઠિતાનિ દિને દિને ॥ ૯॥

રાધયન્નીક્ષિતાનર્થાન્દદત્યમૃતમત્યયમ્ ।
ક્ષપયત્યપમૃત્યું ચ મારયન્તિ દ્વિપોઽખિલાન્ ॥ ૧૦॥

ઘ્નન્તિ રોગાનથોત્પાતાન્મઙ્ગલં કુર્વતેન્વહમ્ ।
કિમુતાન્યત્ સદા સન્નિધાપયત્યર્થિકામપિ ॥ ૧૧॥

ત્રિપુરઘ્નોઽપ્યદોનામસહસ્રં પઠતિ પ્રિયે ।
તદાજ્ઞયાપ્યહમપિ કીર્તયામિ દિનેદિને । ૧૨॥

ભવત્યપીદમસ્મત્તઃ શિક્ષિત્વા તુ પઠિષ્યતિ ।
ભવિષ્યતિ ચ નિર્ણીતં ચતુર્વર્ગસ્ય ભાજનમ્ ॥ ૧૩॥

મનોન્યતો નિરાકૃત્ય સાવધાના નિશામય ।
નામ્નાં કામકલાકાલ્યાઃ સહસ્રં મુક્તિદાયકમ્ ॥ ૧૪॥

ૐ અસ્ય કામકલાકાલીસહસ્રનામસ્તોત્રસ્ય શ્રીત્રિપુરઘ્નઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । ત્રિજગન્મયરૂપિણી ભગવતી શ્રીકામકલાકાલી દેવતા ।
ક્લીં બીજમ્ । સ્ફ્રોં શક્તિઃ । હું કીલકં । ક્ષ્રૌં તત્ત્વં ।
શ્રીકામકલાકાલીસહસ્રનામસ્તોત્રપાઠે જપે વિનિયોગઃ । ૐ તત્સત્ ॥

ૐ ક્લીં કામકલાકાલી કાલરાત્રિઃ કપાલિની ।
કાત્યાયની ચ કલ્યાણી કાલાકારા કરાલિની ॥ ૧૫॥

ઉગ્રમૂર્તિર્મહાભીમા ઘોરરાવા ભયઙ્કરા ।
ભૂતિદામયહન્ત્રી ચ ભવબન્ધવિમોચની ॥ ૧૬॥

ભવ્યા ભવાની ભોગાઢ્યા ભુજઙ્ગપતિભૂષણા ।
મહામાયા જગદ્ધાત્રી પાવની પરમેશ્વરી ॥ ૧૭॥

યોગમાતા યોગગમ્યા યોગિની યોગિપૂજિતા ।
ગૌરી દુર્ગા કાલિકા ચ મહાકલ્પાન્તનર્તકી ॥ ૧૮॥

અવ્યયા જગદાદિશ્ચ વિધાત્રી કાલમર્દ્દિની ।
નિત્યા વરેણ્યા વિમલા દેવારાધ્યામિતપ્રભા ॥ ૧૯॥

ભારુણ્ડા કોટરી શુદ્ધા ચઞ્ચલા ચારુહાસિની ।
અગ્રાહ્યાતીન્દ્રિયાગોત્રા ચર્ચરોર્દ્ધ્વશિરોરુહા ॥ ૨૦॥

કામુકી કમનીયા ચ શ્રીકણ્ઠમહિષી શિવા ।
મનોહરા માનનીયા મતિદા મણિભૂષણા ॥ ૨૧॥

શ્મશાનનિલયા રૌદ્રા મુક્તકેશ્યટ્ટહાસિની ।
ચામુણ્ડા ચણ્ડિકા ચણ્ડી ચાર્વઙ્ગી ચરિતોજ્જ્વલા ॥ ૨૨॥

ઘોરાનના ધૂમ્રશિખા કંપના કંપિતાનના ।
વેપમાનતનુર્ભીદા નિર્ભયા બાહુશાલિની ॥ ૨૩॥

ઉલ્મુકાક્ષી સર્પકર્ણી વિશોકા ગિરિનન્દિની ।
જ્યોત્સ્નામુખી હાસ્યપરા લિઙ્ગાલિઙ્ગધરા સતી ॥ ૨૪॥

અવિકારા મહાચિત્રા ચન્દ્રવક્ત્રા મનોજવા ।
અદર્શના પાપહરા શ્યામલા મુણ્ડમેખલા ॥ ૨૫॥

મુણ્ડાવતંસિની નીલા પ્રપન્નાનન્દદાયિની ।
લઘુસ્તની લમ્બકુચા ઘૂર્ણમાના હરાઙ્ગના ॥ ૨૬॥

વિશ્વાવાસા શાન્તિકરી દીર્ઘકેશ્યરિખણ્ડિની ।
રુચિરા સુન્દરી કમ્રા મદોન્મત્તા મદોત્કટા ॥ ૨૭॥

અયોમુખી વહ્નિમુખી ક્રોધનાઽભયદેશ્વરી ।
કુડમ્બિકા સાહસિની ખડ્ગકી રક્તલેહિની ॥ ૨૮॥

વિદારિણી પાનરતા રુદ્રાણી મુણ્ડમાલિની ।
અનાદિનિધના દેવી દુર્નિરીક્ષ્યા દિગમ્બરા ॥ ૨૯॥

વિદ્યુજ્જિહ્વા મહાદંષ્ટ્રા વજ્રતીક્ષ્ણા મહાસ્વના ।
ઉદયાર્કસમાનાક્ષી વિન્ધ્યશૈલસમાકૃતિઃ ॥ ૩૦॥

નીલોત્પલદલશ્યામા નાગેન્દ્રાષ્ટકભૂષિતા ।
અગ્નિજ્વાલકૃતાવાસા ફેત્કારિણ્યહિકુણ્ડલા ॥ ૩૧॥

પાપઘ્ની પાલિની પદ્મા પૂણ્યા પુણ્યપ્રદા પરા ।
કલ્પાન્તામ્ભોદનિર્ઘોષા સહસ્રાર્કસમપ્રભા ॥ ૩૨॥

સહસ્રપ્રેતરાટ્ ક્રોધા સહસ્રેશપરાક્રમા ।
સહસ્રધનદૈશ્વર્યા સહસ્રાઙ્ઘ્રિકરામ્બિકા ॥ ૩૩॥

સહસ્રકાલદુષ્પ્રેક્ષ્યા સહસ્રેન્દ્રિયસઞ્ચયા ।
સહસ્રભૂમિસદના સહસ્રાકાશવિગ્રહા ॥ ૩૪॥

સહસ્રચન્દ્રપ્રતિમા સહસ્રગ્રહચારિણી ।
સહસ્રરુદ્રતેજસ્કા સહસ્રબ્રહ્મસૃષ્ટિકૃત્ ॥ ૩૫॥

સહસ્રવાયુવેગા ચ સહસ્રફણકુણ્ડલા ।
સહસ્રયન્ત્રમથિની સહસ્રોદધિસુસ્થિરા ॥ ૩૬॥

સહસ્રબુદ્ધકરુણા મહાભાગા તપસ્વિની ।
ત્રૈલોક્યમોહિની સર્વભૂતદેવવશઙ્કરી ॥ ૩૭॥

સુસ્નિગ્ધહૃદયા ઘણ્ટાકર્ણા ચ વ્યોમચારિણી ।
શઙ્ખિની ચિત્રિણીશાની કાલસંકર્પિણી જયા ॥ ૩૮॥

અપરાજિતા ચ વિજયા કમલા કમલાપ્રદા ।
જનયિત્રી જગદ્યોનિર્હેતુરૂપા ચિદાત્મિકા ॥ ૩૯॥

અપ્રમેયા દુરાધર્ષા ધ્યેયા સ્વચ્છન્દચારિણી ।
શાતોદરી શામ્ભવિની પૂજ્યા માનોન્નતાડમલા ॥ ૪૦॥

ઓંકારરૂપિણી તામ્રા બાલાર્કસમતારકા ।
ચલજ્જિહ્વા ચ ભીમાક્ષી મહાભૈરવનાદિની ॥ ૪૧॥

સાત્વિકી રાજસી ચૈવ તામસી ઘર્ઘરાડચલા ।
માહેશ્વરી તથા બ્રાહ્મી કૌમારી માનિનીશ્વરા ॥ ૪૨॥

સૌપર્ણી વાયવી ચૈન્દ્રી સાવિત્રી નૈરૃતી કલા ।
વારુણી શિવદૂતી ચ સૌરી સૌમ્યા પ્રભાવતી ॥ ૪૩॥

વારાહી નારસિંહી ચ વૈષ્ણવી લલિતા સ્વરા ।
મૈત્ર્યાર્યમ્ની ચ પૌષ્ણી ચ ત્વાષ્ટ્રીવાસવ્યુમારતિઃ ॥ ૪૪॥

રાક્ષસી પાવની રૌદ્રી દાસ્રી રોદસ્યુદુમ્બરી ।
સુભગા દુર્ભગા દીના ચઞ્ચુરીકા યશસ્વિની ॥ ૪૫॥

મહાનન્દા ભગાનન્દા પિચ્છિલા ભગમાલિની ।
અરુણા રેવતી રક્તા શકુની શ્યેનતુણ્ડિકા ॥ ૪૬॥

સુરભી નન્દિની ભદ્રા વલા ચાતિવલામલા ।
ઉલુપી લમ્બિકા ખેટા લેલિહાનાન્ત્રમાલિની ॥ ૪૭॥

વૈનાયિકી ચ વેતાલી ત્રિજટા ભૃકુટી મતી ।
કુમારી યુવતી પ્રૌઢા વિદગ્ધા ઘસ્મરા તથા ॥ ૪૮॥

જરતી રોચના ભીમા દોલમાલા પિચિણ્ડિલા ।

અલમ્બાક્ષી કુમ્ભકર્ણી કાલકર્ણી મહાસુરી ॥ ૪૯॥

ઘણ્ટારવાથ ગોકર્ણા કાકજઙ્ઘા ચ મૂષિકા ।
મહાહનુર્મહાગ્રીવા લોહિતા લોહિતાશની ॥ ૫૦।
કીર્તિઃ સરસ્વતી લક્ષ્મીઃ શ્રદ્ધા બુદ્ધિઃ ક્રિયા સ્થિતિઃ ।
ચેતના વિષ્ણુમાયા ચ ગુણાતીતા નિરઞ્જના ॥ ૫૧॥

નિદ્રા તન્દ્રા સ્મિતા છાયા જૃમ્ભા ક્ષુદશનાયિતા ।
તૃષ્ણા ક્ષુધા પિપાસા ચ લાલસા ક્ષાન્તિરેવ ચ ॥ ૫૨॥

વિદ્યા પ્રજા સ્મૃતિ કાન્તિરિચ્છા મેધા પ્રભા ચિતિઃ ।
ધરિત્રી ધરણી ધન્યા ધોરણી ધર્મસન્તતિઃ ॥ ૫૩॥

હાલાપ્રિયા હારરતિર્હારિણી હરિણેક્ષણા ।
ચણ્ડયોગેશ્વરી સિદ્ધિ કરાલી પરિડામરી ॥ ૫૪॥

જગદાન્યા જનાનન્દા નિત્યાનન્દમયી સ્થિરા ।
હિરણ્યગર્ભા કુણ્ડલિની જ્ઞાનં ધૈર્યઞ્ચ ખેચરી ॥ ૫૫॥

નગાત્મજા નાગહારા જટાભારાયતર્દ્દિની ।
ખડ્ગિની શૂલિની ચક્રવતી વાણવતી ક્ષિતિઃ ॥ ૫૬॥

ધૃણિધર્ત્રી નાલિકા ચ કર્ત્રી મત્યક્ષમાલિની ।
પાશિની પશુહસ્તા ચ નાગહસ્તા ધનુર્ધરા ॥ ૫૭॥

મહામુદ્ગરહસ્તા ચ શિવાપોતધરાપિ ચ ।
નારખપ્પર્રિણી લમ્બત્કચમુણ્ડપ્રધારિણી ॥ ૫૮॥

પદ્માવત્યન્નપૂર્ણાચ મહાલક્ષ્મીઃ સરસ્વતી ।
દુર્ગા ચ વિજયા ઘોરા તથા મહિષમર્દ્દિની ॥ ૫૯॥

ધનલક્ષ્મી જયપ્રદાશ્વાશ્વારૂઢા જયભૈરવી ।
શૂલિની રાજમાતગી રાજરાજેશ્વરી તથા ॥ ૬૦॥

ત્રિપુટોચ્છિષ્ટચાણ્ડાલી અઘોરા ત્વરિતાપિ ચ ।
રાજ્યલક્ષ્મીર્જયમહાચણ્ડયોગેશ્વરી તથા ॥ ૬૧॥

ગુહ્યા મહાભૈરવી ચ વિશ્વલક્ષ્મીરરુન્ધતી ।
યન્ત્રપ્રમથિની ચણ્ડયોગેશ્વર્યપ્યલમ્બુષા ॥ ૬૨॥

કિરાતી મહાચણ્ડભૈરવી કલ્પવલ્લરી ।

ત્રૈલોક્યવિજયા સંપત્પ્રદા મન્થાનભૈરવી ॥ ૬૩॥

મહામન્ત્રેશ્વરી વજ્રપ્રસ્તારિણ્યઙ્ગચર્પટા ।
જયલક્ષ્મીશ્ચણ્ડરૂપા જલેશ્વરી કામદાયિની ॥ ૬૪॥

સ્વર્ણકૂટેશ્વરી રુણ્ડા મર્મરી બુદ્ધિવર્દ્ધિની ।
વાર્ત્તાલી ચણ્ડવાર્ત્તાલી જયવાર્ત્તાલિકા તથા ॥ ૬૫॥

ઉગ્રચણ્ડા સ્મશાનોગ્રા ચણ્ડા વૈ રુદ્રચણ્ડિકા ।
અતિચણ્ડા ચણ્ડવતી પ્રચણ્ડા ચણ્ડનાયિકા ॥ ૬૬॥

ચૈતન્યભૈરવી કૃષ્ણા મણ્ડલી તુમ્બુરેશ્વરી ।
વાગ્વાદિની મુણ્ડમધ્યમત્યનર્ઘ્યા પિશાચિની ॥ ૬૭॥

મઞ્જીરા રોહિણી કુલ્યા તુઙ્ગા પૂર્ણેશ્વરી વરા ।
વિશાલા રક્તચામુણ્ડા અઘોરા ચણ્ડવારુણી ॥ ૬૮॥

ધનદા ત્રિપુરા વાગીશ્વરી જયમઙ્ગલા ।
દૈગમ્બરી કુબ્જિકા ચ કુડુક્કા કાલભૈરવી ॥ ૬૯॥

કુક્કુટી સઙ્કટા વીરા કર્પટા ભ્રમરામ્બિકા ।
મહાર્ણવેશ્વરી ભોગવતી સઙ્કેશ્વરી તથા ॥ ૭૦॥

પુલિન્દી શવરી મ્લેચ્છી પિઙ્ગલા શવરેશ્વરી ।
મોહિની સિદ્ધિલક્ષ્મીશ્ચ બાલા ત્રિપુરસુન્દરી ॥ ૭૧॥

ઉગ્રતારા ચૈકજટા મહાનીલસરસ્વતી ।
ત્રિકણ્ટકી છિન્નમસ્તા મહિષઘ્ની જયાવહા ॥ ૭૨॥

હરસિદ્ધાનઙ્ગમાલા ફેત્કારી લવણેશ્વરી ।
ચણ્ડેશ્વરી નાકુલીચ હયગ્રીવેશ્વરી તથા ॥ ૭૩॥

કાલિન્દી વજ્રવારાહી મહાનીલપતાકિકા ।
હંસેશ્વરી મોક્ષલક્ષ્મીર્ભૂતિની જાતરેતસા ॥ ૭૪॥

શાતકર્ણા મહાનીલા વામા ગુહ્યેશ્વરી ભ્રમિઃ ।
એકાનંશાઽભયા તાર્ક્ષી વાભ્રવી ડામરી તથા ॥ ૭૫॥

કોરઙ્ગી ચર્ચિકા વિન્ના સંસિકા બ્રહ્મવાદિની ।
ત્રિકાલવેદિની નીલલોહિતા રક્તદન્તિકા ॥ ૭૬॥

ક્ષેમઙ્કરી વિશ્વરૂપા કામાખ્યા કુલકુટ્ટની ।
કામાઙ્કુશા વેશિની ચ માયૂરી ચ કુલેશ્વરી ॥ ૭૭॥

ઇભ્રાક્ષી ઘોનકી શાર્ઙ્ગી ભીમા દેવી વરપ્રદા ।
ધૂમાવતી મહામારી મઙ્ગલા હાટકેશ્વરી ॥ ૭૮॥

કિરાતી શક્તિસૌપર્ણી બાન્ધવી ચણ્ડખેચરી ।
નિસ્તન્દ્રા ભવભૂતિશ્ચ જ્વાલાઘણ્ટાગ્નિમર્દ્દિની ॥ ૭૯॥

સુરઙ્ગા કૌલિની રમ્યા નટી ચારાયણી ધૃતિઃ ।
અનન્તા પુઞ્જિકા જિહ્વા ધર્માધર્મપ્રવર્તિકા ॥ ૮૦॥

વન્દિની વન્દનીયા ચ વેલાऽહસ્કરિણી સુધા ।
અરણી માધવી ગોત્રા પતાકા વાગ્મયી શ્રુતિઃ ॥ ૮૧॥

ગૂઢા ત્રિગૂઢા વિસ્પષ્ટા મૃગાઙ્કા ચ નિરિન્દ્રિયા ।
મેનાનન્દકરી વોધ્રી ત્રિનેત્રા વેદવાહના ॥ ૮૨॥

કલસ્વના તારિણી ચ સત્યામત્યપ્રિયાऽજડા ।
એકવક્ત્રા મહાવક્ત્રા બહુવક્ત્રા ઘનાનના ॥ ૮૩॥

ઇન્દિરા કાશ્યપી જ્યોત્સ્ના શવારૂઢા તનૂદરી ।
મહાશઙ્ખધરા નાગોપવીતિન્યક્ષતાશયા ॥ ૮૪॥

નિરિન્ધના ધરાધારા વ્યાધિઘ્ની કલ્પકારિણી ।
વિશ્વેશ્વરી વિશ્વધાત્રી વિશ્વેશી વિશ્વવન્દિતા ॥ ૮૫॥

વિશ્વા વિશ્વાત્મિકા વિશ્વવ્યાપિકા વિશ્વતારિણી ।
વિશ્વસંહારિણી વિશ્વહસ્તા વિશ્વોપકારિકા ॥ ૮૬॥

વિશ્વમાતા વિશ્વગતા વિશ્વાતીતા વિરોધિતા ।
ત્રૈલોક્યત્રાણકર્ત્રી ચ કૂટાકારા કટઙ્કટા ॥ ૮૭॥

ક્ષામોદરી ચ ક્ષેત્રજ્ઞા ક્ષયહીના ક્ષરવર્જિતા ।
ક્ષપા ક્ષોભકરી ક્ષેમ્યાऽક્ષોભ્યા ક્ષેમદુઘા ક્ષિયા ॥ ૮૮॥

સુખદા સુમુખી સૌમ્યા સ્વઙ્ગા સુરપરા સુધીઃ ।
સર્વાન્તર્યામિની સર્વા સર્વારાધ્યા સમાહિતા ॥ ૮૯॥

તપિની તાપિની તીવ્રા તપનીયા  તુ નાભિગા ।
હૈમી હૈમવતી ઋદ્ધિર્વૃદ્ધિર્જ્ઞાનપ્રદા નરા ॥ ૯૦॥

મહાજટા મહાપાદા મહાહસ્તા મહાહનુઃ ।
મહાબલા મહારોપા મહાધૈર્યા મહાઘૃણા ॥ ૯૧॥

મહાક્ષમા પુણ્યપાપધ્વજિની ઘુર્ઘુરારવા ।
ડાકિની શાકિની રમ્યા શક્તિઃ શક્તિસ્વરૂપિણી ॥ ૯૨॥

તમિસ્રા ગન્ધરાશાન્તા દાન્તા ક્ષાન્તા જિતેન્દ્રિયા ।
મહોદયા જ્ઞાનિનીચ્છા વિરાગા સુખિતાકૃતિઃ ॥ ૯૩॥

વાસના વાસનાહીના નિવૃત્તિર્નિર્વૃતિઃ કૃતિઃ ।
અચલા હેતુરુન્મુક્તા જયિની સંસ્મૃતિઃ ચ્યુતા ॥ ૯૪॥

કપર્દિની મુકુટિની મત્તા પ્રકૃતિરૂર્જિતા ।
સદસત્સાક્ષિણી સ્ફીતા મુદિતા કરુણામયી ॥ ૯૫॥

પૂર્વોત્તરા પશ્ચિમા ચ દક્ષિણાવિદિગૂ હતા ।
આત્મારામા શિવારામા રમણી શઙ્કરપ્રિયા ॥ ૯૬॥

વરેણ્યા વરદા વેણી સ્તમ્ભિણ્યાકર્ષિણી તથા ।
ઉચ્ચાટની મારણી ચ દ્વેષિણી વશિની મહી ॥ ૯૭॥

ભ્રમણી ભારતી ભામા વિશોકા શોકહારિણી ।
સિનીવાલી કુહૂ રાકાનુમતિ પદ્મિનીતિહૃત્ ॥ ૯૮॥

સાવિત્રી વેદજનની ગાયત્ર્યાહુતિસાધિકા ।
ચણ્ડાટ્ટહાસા તરુણી ભૂર્ભુવઃસ્વઃકલેવરા ॥ ૯૯॥

અતનુરતનુપ્રાણદાત્રી માતઙ્ગગામિની ।
નિગમાદ્ધિમણિઃ પૃથ્વી જન્મમૃત્યુજરૌષધી ॥ ૧૦૦॥

પ્રતારિણી કલાલાપા વેદ્યાછેદ્યા વસુન્ધરા ।
પ્રક્ષુન્ના વાસિતા કામધેનુર્વાઞ્છિતદાયિની ॥ ૧૦૧॥

સૌદામિની મેઘમાલા શર્વરી સર્વગોચરા ।
ડમરુર્ડમરુકા ચ નિઃસ્વરા પરિનાદિની ॥ ૧૦૨॥

આહતાત્મા હતા ચાપિ નાદાતીતા વિલેશયા ।
પરાऽપારા ચ પશ્યન્તી મધ્યમા વૈખરી તથા ॥ ૧૦૩॥

પ્રથમા ચ જઘન્યા ચ મધ્યસ્થાન્તવિકાશિની ।

પૃષ્ઠસ્થા ચ પુરઃસ્થા ચ પાર્શ્વસ્થોર્ધ્વતલસ્થિતા ॥ ૧૦૪॥

નેદિષ્ઠા ચ દવિષ્ઠા ચ વર્હિષ્ઠા ચ ગુહાશયા ।
અપ્રાપ્યા વૃંહિતા પૂર્ણા પુણ્યૈર્નવિદનામયા ॥ ૧૦૫॥ var પુણ્યૈર્વેદ્યાહ્ય
સુદર્શના ચ ત્રિશિખા વૃહતી સન્તતિર્વિના ।
ફેત્કારિણી દીર્ઘસ્રુક્કા ભાવના ભવવલ્લભા ॥ ૧૦૬॥

ભાગીરથી જાહ્નવી ચ કાવેરી યમુના સ્મયા ।
સિપ્રા ગોદાવરી વેણ્યા વિપાશા નર્મદા ધુની ॥ ૧૦૭॥

ત્રેતા સ્વાહા સામિધેની સ્રુક્સ્રુવા ચ ક્રવાવસુઃ ।
ગર્વિતા માનિની મેના નન્દિતા નન્દનન્દિની ॥ ૧૦૮॥

નારાયણી નારકઘ્ની રુચિરા રણશાલિની ।
આધારણાધારતમા ધર્મા ધ્વન્યા ધનપ્રદા ॥ ૧૦૯॥

અભિજ્ઞા પણ્ડિતા મૂકા વાલિશા વાગવાદિની ।
બ્રહ્મવલ્લી મુક્તિવલ્લી સિદ્ધિવલ્લી વિપહ્નવી ॥ ૧૧૦॥

આહ્લાદિની જિતામિત્રા સાક્ષિણી પુનરાકૃતિ ।
કિર્મરી સર્વતોભદ્રા સ્વર્વેદી મુક્તિપદ્ધતિઃ ॥ ૧૧૧॥

સુષમા ચન્દ્રિકા વન્યા કૌમુદી કુમુદાકરા ।
ત્રિસન્ધ્યામ્નાયસેતુશ્ચ ચર્ચાઽછાયારિ નૈષ્ઠિકી ॥ ૧૧૨॥

કલા કાષ્ઠા તિથિસ્તારા સંક્રાતિર્વિષુવત્તથા ।
મઞ્જુનાદા મહાવલ્ગુ ભગ્નભેરીસ્વનાઽરટા ॥ ૧૧૩॥

ચિત્રા સુપ્તિઃ સુષુપ્તિશ્ચ તુરીયા તત્ત્વધારણા ।
મૃત્યુઞ્જયા મૃત્યુહરી મૃત્યુમૃત્યુવિધાયિની ॥ ૧૧૪॥

હંસી પરમહંસી ચ બિન્દુનાદાન્તવાસિની ।
વૈહાયસી ત્રૈદશી ચ ભૈમીવાસાતની તથા ॥ ૧૧૫॥

દીક્ષા શિક્ષા અનૂઢા ચ કઙ્કાલી તૈજસી તથા ।
સુરી દૈત્યા દાનવી ચ નરો નાથા સુરી ત્વરી ॥ ૧૧૬॥

માધ્વી ખના ખરા રેખા નિષ્કલા નિર્મમા મૃતિઃ ।
મહતી વિપુલા સ્વલ્પા ક્રૂરા ક્રૂરાશયાપિ ચ ॥ ૧૧૭॥

ઉન્માથિની ધૃતિમતી વામની કલ્પચારિણી ।

વાડવી વડવા ખોઢા કોલા પિતૃવલાયના ॥ ૧૧૮॥

પ્રસારિણી વિશારા ચ દર્પિતા દર્પણપ્રિયા ।
ઉત્તાનાધોમુખી સુપ્તા વઞ્ચન્યાકુઞ્ચની ત્રુટિઃ ॥ ૧૧૯॥

ક્રાદિની યાતનાદાત્રી દુર્ગા દુર્ગાર્તિનાશિની ।
ધરાધરસુતા ધીરા ધરાધરકૃતાલયા ॥ ૧૨૦॥

સુચરિત્રી તથાત્રી ચ પૂતના પ્રેતમાલિની ।
રમ્ભોર્વશી મેનકા ચ કલિહૃત્કાલકૃદ્દ્શા ॥ ૧૨૧॥

હરીષ્ટદેવી હેરમ્બમાતા હર્યક્ષવાહના ।
શિખણ્ડિની કોણ્ડયિની વેતુણ્ડી મન્ત્રમયપિ ॥ ૧૨૨॥

વજ્રેશ્વરી લોહદણ્ડા દુર્વિજ્ઞેયા દુરાસદા ।
જાલિની જાલપા યાજ્યા ભગિની ભગવત્યપિ ॥ ૧૨૩॥

ભૌજઙ્ગી તુર્વરા વભ્રુ મહનીયા ચ માનવી ।
શ્રીમતી શ્રીકરી ગાદ્ધી સદાનન્દા ગણેશ્વરી ॥ ૧૨૪॥

અસન્દિગ્ધા શાશ્વતા ચ સિદ્ધા સિદ્ધેશ્વરીડિતા ।
જ્યેષ્ઠા શ્રેષ્ઠા વરિષ્ઠા ચ કૌશામ્બી ભક્તવત્સલા ॥ ૧૨૫॥

ઇન્દ્રનીલનિભા નેત્રી નાયિકા ચ ત્રિલોચના ।
વાર્હસ્પત્યા ભાર્ગવી ચ આત્રેયાઙ્ગિરસી તથા ॥ ૧૨૬॥

ધુર્યાધિહર્ત્રી ધારિત્રી વિકટા જન્મમોચિની ।
આપદુત્તારિણી દૃપ્તા પ્રમિતા મિતિવર્જિતા ॥ ૧૨૭॥

ચિત્રરેખા ચિદાકારા ચઞ્ચલાક્ષી ચલત્પદા ।
વલાહકી પિઙ્ગસટા મૂલભૂતા વનેચરી ॥ ૧૨૮॥

ખગી કરન્ધમા ધ્માક્ષ્યી સંહિતા કેરરીન્ધના । var ધ્માક્ષી
અપુનર્ભવિની વાન્તરિણી ચ યમગઞ્જિની ॥ ૧૨૯॥

વર્ણાતીતાશ્રમાતીતા મૃડાની મૃડવલ્લભા ।
દયાકરી દમપરા દંભહીના દૃતિપ્રિયા ॥ ૧૩૦॥

નિર્વાણદા ચ નિર્બન્ધા ભાવાભાવવિધાયિની ।
નૈઃશ્રેયસી નિર્વિકલ્પા નિર્વીજા સર્વવીજિકા ॥ ૧૩૧॥

અનાદ્યન્તા ભેદહીના બન્ધોન્મૂલિન્યવાધિતા ।
નિરાભાસા મનોગમ્યા સાયુજ્યામૃતદાયિની ॥ ૧૩૨॥

ઇતીદં નામસાહસ્રં નામકોટિશતાધિકમ્ ।
દેવ્યાઃ કામકલાકાલ્યા મયાતે પ્રતિપાદિતમ્ ॥ ૧૩૩॥

નાનેન સદૃશં સ્તોત્રં ત્રિષુ લોકેષુ વિદ્યતે ।
યદ્યપ્યમુષ્ય મહિમા વર્ણિતું નૈવ શક્યતે ॥ ૧૩૪॥

પ્રરોચનાતયા કશ્ચિત્તથાપિ વિનિગદ્યતે ।
પ્રત્યહં ય ઇદં દેવિ કીર્ત્તયેદ્વા શ઼ૃણોતિ વા ॥ ૧૩૫॥

ગુણાધિક્યમૃતે કોઽપિ દોષો નૈવોપજાયતે ।
અશુભાનિ ક્ષયં યાન્તિ જાયન્તે મઙ્ગલાન્યથા ॥ ૧૩૬॥

પારત્રિકામુષ્મિકૌ દ્વૌ લોકૌ તેન પ્રસાધિતૌ ।
બ્રાહ્મણો જાયતે વાગ્મી વેદવેદાઙ્ગપારગઃ ॥ ૧૩૭॥

ખ્યાતઃ સર્વાસુ વિદ્યાસુ ધનવાન્ કવિપણ્ડિતઃ ।
યુદ્ધે જયી ક્ષત્રિયઃ સ્યાદ્દાતા ભોક્તા રિપુઞ્જયઃ ॥ ૧૩૮॥

આહર્તા ચાશ્વમેધસ્ય ભાજનં પરમાયુષામ્ ।
સમૃદ્ધો ધન ધાન્યેન વૈશ્યો ભવતિ તત્ક્ષણાત્ ॥ ૧૩૯॥

નાનાવિધપશૂનાં હિ સમૃદ્ધ્યા સ સમૃધ્દતે ।
શૂદ્રઃ સમસ્તકલ્યાણમાપ્નોતિ શ્રુતિકીર્તનાત્ ॥ ૧૪૦॥

ભુઙ્ક્તે સુખાનિ સુચિરં રોગશોકૌ પરિત્યજન્ ।
એવ નાર્યપિ સૌભાગ્યં ભર્તૃં હાર્દં સુતાનપિ ॥ ૧૪૧॥

પ્રાપ્નોતિ શ્રવણાદસ્ય કીર્તનાદપિ પાર્વતિ ।
સ્વસ્વાભીષ્ટમથાન્યેઽપિ લભન્તેઽસ્ય પ્રસાદતઃ ॥ ૧૪૨॥

આપ્નોતિ ધાર્મિકો ધર્માનર્થાનાપ્નોતિ દુર્ગતઃ ।
મોક્ષાર્થિનસ્તથા મોક્ષં કામુકા કામિનીં વરામ્ ॥ ૧૪૩॥

યુદ્ધે જયં નૃપાઃ ક્ષીણાઃ કુમાર્યઃ સત્પતિં તથા ।
આરોગ્ય રોગિણશ્ચાપિ તથા વંશાર્થિનઃ સુતાન્ ॥ ૧૪૪॥

જયં વિવાદે કલિકૃત્સિદ્ધીઃ સિદ્ધીછુરુત્તમાઃ ।
નિયુક્તા બન્ધુભિઃ સઙ્ગં ગતાયુશ્ચાયુષાઞ્ચયમ્ ॥ ૧૪૫॥

સદા ય એતત્પઠતિ નિશીથે ભક્તિભાવિતઃ ।
તસ્યા સાધ્યમથાપ્રાપ્યન્ત્રૈલોક્યે નૈવ વિદ્યતે ॥ ૧૪૬॥

કીર્તિં ભોગાન્ સ્ત્રિયઃ પુત્રાન્ધનં ધાન્યં હયાન્ગજાન્ ।
જ્ઞાતિશ્રૈષ્ઠ્યં પશૂન્ભૂમિં રાજવશ્યઞ્ચ માન્યતામ્ ॥ ૧૪૭॥

લભતે પ્રેયસિ ક્ષુદ્રજાતિરપ્યસ્ય કીર્તનાત્ ।
નાસ્ય ભીતિર્ન્ન દૌર્ભાગ્યં નાલ્પાયુષ્યન્નરોગિતા ॥ ૧૪૮॥

ન પ્રેતભૂતાભિભવો ન દોષો ગ્રહજસ્તથા ।
જાયતે પતિતો નૈવ ક્વચિદપ્યેષ સઙ્કટે ॥ ૧૪૯॥

યદીચ્છસિ પરં શ્રેયસ્તર્ત્તું સઙ્કટમેવ ચ ।
પઠાન્વહમિદં સ્તોત્રં સત્યં સત્યં સુરેશ્વરિ ॥ ૧૫૦॥

ન સાસ્તિ ભૂતલે સિદ્ધિઃ કીર્તનાદ્યા ન જાયતે ।
શ‍ૃણુ ચાન્યદ્વરારોહે કીર્ત્યમાનં વચો મમ ॥ ૧૫૧॥

મહાભૂતાનિ પઞ્ચાપિ ખાન્યેકાદશ યાનિ ચ ।
તન્માત્રાણિ ચ જીવાત્મા પરમાત્મા તથૈવ ચ ॥ ૧૫૨॥

સપ્તાર્ણવાઃ સપ્તલોકા ભુવનાનિ ચતુર્દ્દશ ।
નક્ષત્રાણિ દિશઃ સર્વાઃ ગ્રહાઃ પાતાલસપ્તકમ્ ॥ ૧૫૩॥

સપ્તદ્વીપવતી પૃથ્વી જઙ્ગમાજઙ્ગમં જગત્ ।
ચરાચરં ત્રિભુવનં વિદ્યાશ્ચાપિ ચતુર્દ્દશ ॥ ૧૫૪॥

સાંખ્યયોગસ્તથા જ્ઞાનં ચેતના કર્મવાસના ।
ભગવત્યાં સ્થિતં સર્વં સૂક્ષ્મરૂપેણ બીજવત્ ॥ ૧૫૫॥

સા ચાસ્મિન્ સ્તોત્રસાહસ્રે સ્તોત્રે તિષ્ઠતિ વદ્ધ્વત્ ।
પઠનીયં વિદિત્વૈવં સ્તોત્રમેતત્સુદુર્લભમ્ ॥ ૧૫૬॥

દેવીં કામકલાકાલીં ભજન્તઃ સિદ્ધિદાયિનીમ્ ।
સ્તોત્રં ચાદઃ પઠન્તો હિ સાધયન્તીપ્સિતાન્ સ્વકાન્ ॥ ૧૫૭॥

॥ ઇતિ મહાકાલસંહિતાયાં કામકલાખણ્ડે દ્વાદશપટલે
શ્રીકામકલાકાલીસહસ્રનામસ્તોત્રં સંપૂર્ણમ્ ॥

Proofread by DPD, Narayanaswami Pallasena ppnswami at gmail.com

*Shri Kamakalakali Sahasranamastotram*

pdf was typeset on January 30, 2023

Please send corrections to *sanskrit@cheerful.com*